# Buddha Stotram

# बुद्धस्तोत्रम्

## Document Information

Text title : Buddha Stotram

File name : buddhastotram.itx

Category : vishhnu, dashAvatAra, viShNu, buddha, stotra

Location : doc_vishhnu

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# बुद्धस्तोत्रम्

ॐ नमो बुद्धाय ।
नमोऽस्तु बुद्धाय विशुद्धबोधये विशुद्धधर्मप्रतिभासबुद्धये ।
सद्धर्मपुण्योपगतानुबुद्धये भवाग्रशून्याय विशुद्धबुद्धये ॥ १॥

अहो अहो बुद्धमनन्ततेजसमहो अहो सागरमेरुगुल्मम् ।
अहो अहो बुद्धमनन्तगोचरमौदुम्बरं पुष्पमिवातिदुर्लभम् ॥ २॥

अहो महाकारुणिकस्तथागतः अहो अहो शाक्यकुलस्य केतुः ।
अहो प्रणम्यः स नरेन्द्रसूर्यो येनेदृशं भाषितसूत्रमुत्तमम् ॥ ३॥

अनुग्रहार्थं स हि सर्वसत्त्वान् सद्धर्मचर्यामुपदिश्य नूनम् ।
शान्तेश्वरः शाक्यमुनिस्तथागतः सत्त्वोत्तमः शान्तपुरं प्रविष्टः ॥ ४॥

गम्भीरशान्तं विरजासमाधिपदं प्रविष्टे जिनबुद्धगोचरे ।
शून्याश्च कायास्त्वथ श्रावकाणां शून्या विहारा द्विपदोत्तमानाम् ॥ ५॥

ते सर्वधर्मा प्रकृतिश्च शून्या सत्त्वा हि शून्या नहि जातु विद्यते ॥ ६॥

नित्यं च नित्यं च जिनं स्मरामि नित्यं च शोचामि जिनस्य दर्शनम् ।
नित्यं च नित्यं प्रणिधिं करोमि सम्बुद्धपूज्यस्य च दर्शनार्थम् ॥ ७॥

स्थाप्येह नित्यं धरणीषु जानु शोकाभितप्तो जिनदर्शनाय ।
ओदन्तकारुण्यविनायकस्त्वमतीव तृष्णा सुगतस्य दर्शने ॥ ८॥

सतां वरो यद्विजहार नित्यं ददाहि मे दर्शनतोयशीतलम् ।
सत्त्वाः सतृष्णास्तव रूपदर्शने प्रह्लादयैनान् करुणाजलेन ॥ ९॥

कारुण्यभावं कुरु नाथ नायक ददाहि मे दर्शनं सौम्यरूपम् ।
त्वं पाहि त्रातर्जगदेकदेशिता शून्याश्च कायास्त्वथ श्रावकाणाम् ॥ १०॥

आकाशतुल्या गगनस्वभावा मायामरीच्योदकचन्द्रकायाः ।
सर्वे च सत्त्वाः सुखितस्वभावा भवन्तु भो नायक त्वत्प्रसादात् ॥ ११॥

इति बोधिसत्त्वसमुच्चयानाम कुलदेवताविरचितं बुद्धस्तोत्रं सम्पूर्णम् ॥

*Buddha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*